नीहारः। इति त्रिकाण्डशेषः॥ आकाशवारि, यथाह राजवल्लभः। [लुताश्च।
"वर्षासु चरन्ति घनैः सहोरगा वियति कीट-
तद्विषदुष्टमपेयं खजलमगस्त्योदयात् पूर्व्वम्॥"
खजा, स्त्री, (खज्+भावे अप् टाप् च।) मन्थः। मन्थोया इति भाषा॥ प्रहस्तः। इति मेदिनी॥ (खज्+करणे अप् स्त्रियां टाप्।) दर्व्वी। इति हेमचन्द्रः॥ (यथा, चिकित्सितस्थाने षड्विंशेऽध्याये सुश्रुतेनोक्तम्।
"गुवाफलं गोक्षुरकाच बीजं
तयोश्चूर्णं गोपयसा विपाच्य।
खजाहतं शर्करया च युक्तं
पीत्वा नरो हृष्यति सर्व्वरात्रम्॥"
पाकसाधनद्रव्यविशेषः। यथा, महाभारते। ४।७।१।
"खजाश्च दर्व्वीश्च करेण धारय-
न्नसिश्च कालाङ्गमकोषमव्रणम्।")
मारणम्। इति शब्दरत्नावली॥
खजाकः, पुं, (खज् मन्थे+"खजेराकः।" उणां ४।१३। इति आकः।) पक्षी। इत्युणादिवृत्तिः॥
खजाका, स्त्री, पुं, (खजति मथ्नाति पाकम्। खज् मन्थे+"खजेराकः।" उणां ४।१३। इति आकः ततष्टाप्।) दर्व्वी। इत्यमरः। २।९।३४। हाता चमस इत्यादि भाषा॥
("खजाकः पक्षिणि ख्यातः खजाका दर्व्विरुच्यते॥"
इत्युणादिवृत्तिटीका।)
खजित्, पुं, (खेन आकाशध्यानेन शून्यभावनयेति भावः जयति संसारभावं यः। जि+क्विप्। शून्यवादिनां बौद्धानां शून्यं सर्व्वमेव इत्याकारभावनया संसारभावजयनात् तथात्वम्।) बुद्धविशेषः। इति हेमचन्द्रः। २। १४९॥
खज्योतिः, [स्] पुं, (खे आकाशे ज्योतिर्यस्य।) खद्योतः। इति राजनिर्घण्टः॥
खञ्जः, त्रि, (खजि गतिवैकल्ये+अच्।) विकलगतिः। खोँड़ा इति भाषा॥ यथा, मनुः।३।२४२।
"खञ्जो वा यदि वा काणो दातुः प्रेष्योऽपि वा
भवेत्॥")
तत्पर्य्यायः। खोड़ः २। इत्यमरः।२।६।४९। खोलः ३। इति शब्दरत्नावली॥ खोरः ४ खञ्जकः ५। इति हेमचन्द्रः॥ खोटः ६। इति खोड़धात्वर्थदर्शनात्॥ तस्य लक्षणं यथाह माधवकरः।
"वायुः कट्याश्रितः सक्थ्नः कण्डरामाक्षिपेद्यदा।
खञ्जस्तदा भवेज्जन्तुः पङ्गुः सक्थ्नोर्द्वयोर्वधात्॥"
खञ्जकः, त्रि, (खञ्जतीति। खजि+कर्त्तरि ण्वुल्। स्वार्थे कन् वा।) खञ्जः। इति हेमचन्द्रः।३।११६॥
खञ्जकारिः, पुं, (खञ्जकस्य अरिः नाशकः।) शुण्ठा। इति राजनिर्घण्टः॥ खेँसारि इति भाषा॥
खञ्जखेटः, पुं, (खञ्ज इव खेटति गच्छति भूम्यामिव भूमौ चरतीत्यर्थः। खिट्+अच्।) खञ्जनपक्षी। इति शब्दमाला॥
खञ्जखेलः, पुं, (खञ्ज इव खेलति तन्नचलनादित्यर्थः। खेल्+अच्।) खञ्जनपक्षी। इति त्रिकाण्डशेषः॥
खञ्जनं, क्ली, (खजि विकलगतौ+भावे ल्युट्।) गमनम्। इति मेदिनी। ने। ५५॥
खञ्जनः, पुं, (खजि+कर्त्तरि ल्युः।) खनामख्यातपक्षी। तत्पर्य्यायः। खञ्जरीटः २। इत्यमरः। २।५।१५॥ कर्णाटीनः३ काकच्छर्द्दिः४ खञ्जखेलः५ तातनः ६ मुनिपुत्रकः ७ भद्रनामा ८ रत्ननिधिः ९। इति त्रिकाण्डशेषः॥ खञ्जखेटः १० गूढनीड़ः ११ तञ्जकः १२ चरः १३। इति शब्दमाला॥ काकच्छदः १४ नीलकण्ठः १५ कर्णाटीरः १६ कर्णाटारकः १७। इति शब्दरत्नावली॥ (अस्य दर्शनेन यत् शुभाशुभं फलं भवति तदुक्तं बृहत्संहितायां ४५ अध्याये। तद्यथा,—
"खञ्जनको नामायं यो विहगस्तस्य दर्शने प्रथमे।
प्रोक्तानि यानि मुनिभिः फलानि तानि
प्रवक्ष्यामि॥"
तत्र चत्वारः खञ्जना भवन्ति। तेषां नामान्याह।
"स्थूलोऽभ्युन्नतकण्ठः कृष्णगलो भद्रकारको भद्रः।
आ कण्ठमुखात् कृष्णः सम्पूर्णः पूरयत्याशाम्॥
कृष्णो गलेऽस्य बिन्दुः सितकरटान्तः स रिक्त-
कृद्रिक्तः।
पीतो गोपीत इति क्लेशकरः खञ्जनो दृष्टः॥"
अथ कस्मिन् काले दृष्टः कीदृक्फलं करोति इत्याह।
"अथ मधुरसुरभिफलकुसुमतरुषु सलिलाशयेषु
पुण्येषु।
करितुरगभुजगमूर्द्धसु प्रासादोद्यानहर्म्म्येषु॥
गोगोष्ठसत्समागमयज्ञोत्सवपार्थिवद्विजसमीपे।
हस्तितुरङ्गमशालाच्छत्रध्वजचामराद्येषु॥
हेमसमीपसिताम्बरकमलोत्पलपूजितोपलिप्तेषु।
दधिपात्रधान्यकूटेषु च श्रियं खञ्जनः कुरुते॥
पङ्के स्वाद्वन्नाप्तिर्गोरससम्पच्च गोमयोपगते।
शाद्वलगे वस्त्राप्तिः शकटस्थे देशविभ्रंशः॥
गृहपटलेऽर्थभ्रंशो वध्रे बन्धोऽशुचौ भवति रोगः।
पृष्ठे त्वजाविकानां प्रियसङ्गममावहत्याशु॥
महिषोष्ट्रगर्दभास्थिश्मशानगृहकोणशर्करा-
द्रिस्थः।
प्राकारभस्मकेशेषु चाशुभो मरणरुग्भयदः॥
पक्षौ धुन्वन्नशुभः शुभः पिबन् वारि निम्नगासंस्थः।
सूर्य्योदयेऽथ शस्तो नेष्टफलः खञ्जनोऽस्तमये॥
नीराजने निवृत्ते यया दिशा खञ्जनं नृपो यान्तम्।
पश्येत्तया गतस्य क्षिप्रमरातिर्वशमुपैति॥
तस्मिन् निधिर्भवति मैथुनमेति यस्मिन्
यस्मिंस्तु छर्द्दयति तत्र तलेऽस्ति काचः।
अङ्गारमप्युपदिशन्ति पुरीषणेऽस्य
तत्कौतुकापनयनाय खनेद्धरित्रीम्॥
व्रतविकलविभिन्नरोगितः
स्वतनुसमानफलप्रदः खगः।
धनकृदभिनिलीयमानको
वियति च बन्धुसमागमप्रदः॥
नृपतिरपि शुभं शुभप्रदेशे
खगमवलोक्य महीतले विदध्यात्।
सुरभिकुसुमधूपयुक्तमर्घं
शुभमभिनन्दितमेवमेति वृद्धिम्॥
अशुभमपि विलोक्य खञ्जनं
द्विजगुरुसाधुसुरार्च्चने रतः।
न नृपतिरशुभं समाप्नुया-
न्न यदि दिनानि च सप्त मांसभुक्॥"
ततः कालफलप्रदर्शनार्थमाह। [दिनशेषे।
"आ वर्षात् प्रथमे दर्शने फलं प्रतिदिनं तु
दिक्स्थानमूर्त्तिलग्नर्क्षशान्तदीप्तादिभिश्चोह्यम्॥"
शकुने दिग्विशेषेऽस्य शब्दफलं यथा,—
"वित्तं ब्रह्मणि कार्य्यसिद्धिरतुला शक्रे हुताशे भयं
याम्यामप्यभयं सुरद्विषि कलिर्लाभः समुद्रालये।
वायव्यां वरवस्त्रगन्धसलिलं दिवाङ्गना चोत्तरे-
ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने॥")
खञ्जनरतं, क्ली, (खञ्जनस्य रतमिव गोपनीयं अव्यक्तं रतं रतिः।) यमिनां गोप्यं रतम्। यतिनां गोपनीयमैथुनम्। इति हारावली॥
खञ्जना, स्त्री, (खञ्जन इवाचरति। खञ्जन+आप् + क्विप् टाप् च। यद्वा, खजि+युच्+टाप्।) सर्षपी। क्षुद्रखञ्जनजातिः। इति मेदिनी॥
खञ्जनाकृतिः, स्त्री, (खञ्जनस्याकृतिरिवाकृतिरस्य।) खञ्जनविशेषः। इति शब्दचन्द्रिका॥ तत्पर्य्यायः। श्यापुत्रिका २ खञ्जनिका ३ सर्षपी ४। इति शब्दरत्नावली॥
खञ्जनिका, स्त्री, (खञ्जनस्तदाकारोऽस्त्यस्याः इति। खञ्जन+ठन् टाप् च।) खञ्जनाकारपक्षिविशेषः। तत्पर्य्यायः। श्यापुत्रिका २ तुलिका३ स्फोटिका ४ सर्षपी ५। इति त्रिकाण्डशेषः॥ खञ्जनाकृतिः ६। इति शब्दचन्द्रिका॥
खञ्जरीटः, पुं, (खञ्ज इव ऋच्छतीति। ऋ गतौ+ बाहुलकात् कीटन्।) खञ्जनपक्षी। इत्यमरः। २।५।१५॥ (यथा, अमरुशतके। ६६।
"तन्वी शरत्त्रिपथगापुलिने कपोलौ
लोले दृशौ रुचिरचञ्चलखञ्जरीटौ॥")
खट, काङ्क्षे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) खटति। काङ्क्षे आकाङ्क्षायाम्। इति दुर्गादासः॥
खटः, पुं, (खट्+अच्।) अन्धकूपः। कफः। प्रहारान्तरम्। टङ्कः। इति मेदिनी॥ तृणम्। इति हेमचन्द्रः॥ लाङ्गलम्। कत्तृणम्। इति जयपालः॥
खटकः, पुं, (खट्+बाहुलकाद् वुन्।) घटकः। तत्पर्य्यायः। नागवीटः२ टाङ्करः ३ चाचरः४। इति त्रिकाण्डशेषः॥ कुञ्चितपाणिः। इति शब्दमाला॥
खटिकः, पुं, (खटः अस्त्यस्य इति ठन्।) कुञ्चितपाणिः। इति हेमचन्द्रः॥
खटिका, स्त्री, (खट्+अच्। ततः संज्ञायां कन् टाप् अत इत्वं।) लेखनद्रव्यम्। खड़ी इति भाषा। (यथा, कलाविलासे। १।२३।